## भाग – IV (PART – IV)
## संस्कृत (SANSKRIT)

*निर्देश : निम्नलिखित प्रश्नों के उत्तर देने के लिए **सबसे उचित** विकल्प चुनिए।*

**91.** पतत् + अञ्जलिः = पतञ्जलिः अत्र कः सन्धिः ?

[1] परसवर्णसन्धिः

[2] पूर्वरूपसन्धिः

[3] पररूपसन्धिः

[4] अनुनासिकसन्धिः

**92.** 'पाषाणहृदयः' इत्यस्य समस्तपदस्य विग्रहः भविष्यति –

[1] पाषाणवत् हृदय यस्या सा

[2] पाषाणवत् हृदयं यस्य सः

[3] पाषाण एव हृदयम्

[4] पाषाण एव हृदयं यस्य

**93.** 'कुण्ठितः' अस्मिन् पदे सन्धिविधायकं सूत्रं वर्तते –

[1] अनुस्वारस्य ययि परसवर्णः

[2] मोऽनुस्वारः

[3] नश्चापदान्तस्य झलि

[4] नश्च

**94.** विसर्गस्योच्चारणस्थानं वर्तते –

[1] ओष्ठौ [2] मूर्धा

[3] कण्ठः [4] तालुः

**95.** देवर्षि-कलानाथशास्त्रिणः रचना नास्ति –

[1] जीवनस्य पृष्ठचतुष्टयम्

[2] कथानकवल्ली

[3] विद्वज्जनचरितामृतम्

[4] संस्कृतनाट्यवल्लरी

**96.** "चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि" उक्तिरियमस्ति –

[1] मम्मटस्य

[2] विश्वनाथस्य

[3] दण्डिनः

[4] कुन्तकस्य

**97.** 'जगति' शब्दरूपं वर्तते –

[1] पञ्चमी एकवचनस्य

[2] सप्तमी एकवचनस्य

[3] चतुर्थी एकवचनस्य

[4] षष्ठी द्विवचनस्य

98. 'भवन्ति भव्येषु हि पक्षपाताः' उक्तिरियं कस्य कवेः अस्ति ?

[1] कालिदासस्य [2] माघस्य

[3] भासस्य [4] भारवेः

99. वेदपुरुषस्य विविधावयवानां वेदाङ्गत्वेन वर्णने समुचितमस्ति –

[1] छन्दः – हस्तौ

[2] निरुक्तम् – चक्षुः

[3] शिक्षा – घ्राणम्

[4] कल्पः – श्रोत्रम्

100. 'सहयुक्तेऽप्रधाने' इति सूत्रेण तृतीया विभक्तिः भवति –

[1] 'सह' इति पदे

[2] अप्रधाने

[3] प्रधाने

[4] 'सहयुक्त' इति पदे

101. "द्वयोः रात्र्योः समाहारः" इत्यस्य कृते समस्तपदं भविष्यति ?

[1] द्विरात्रम्

[2] द्विरात्रः

[3] द्विरात्रिः

[4] द्विरात्री

102. मुक्तिकोपनिषदनुसारं कति उपनिषदः ?

[1] 10

[2] 101

[3] 108

[4] 1008

103. संहिता कुत्र नित्या न भवति ?

[1] धातूपसर्गयोः कार्ये

[2] वाक्ये

[3] समासे

[4] एकपदे

104. 'सखि' शब्दस्य षष्ठ्येकवचने किं रूपम् स्यात् ?

[1] सखेः [2] सख्युः

[3] सख्याः [4] सखायाः

105. 'राज्ञः समीपम्' – इति विग्रहे समस्तपदं किम् ?

[1] उपराजन्

[2] उपराज

[3] उपराजानाम्

[4] उपराजम्

106. 'अस्मद्' शब्दस्य चतुर्थ्याः रूपं नास्ति –

[1] मा

[2] मे

[3] नौ

[4] नः

107. 'अहर्गणः' अस्य शब्दस्य सिद्धिर्भवति ?

[1] अतो रोरप्लुतादप्लुते

[2] ढ्रलोपे पूर्वस्य दीर्घोऽणः

[3] रोऽसुपि

[4] रषाभ्यां नो णः समानपदे

108. भू-धातोः लिङि रूपं नास्ति –

[1] भवेयम्

[2] भवेयुः

[3] भवेन्

[4] भवेत्

109. 'रसो मुख्यतया अनुकार्ये रामादावेव भवति' मतमिदं कस्य ?

[1] भट्टलोल्लटस्य

[2] शङ्कुकस्य

[3] भट्टनायकस्य

[4] अभिनवगुप्तस्य

110. 'पुनर् + रमते' – इत्यत्र सन्धियुक्तं पदं स्यात् –

[1] पुनः रमते

[2] पुना रमते

[3] पुनो रमते

[4] पुनररमते

111. 'वररुचिः' इति कस्य अपरं नाम ?

[1] यास्कस्य

[2] कात्यायनस्य

[3] पतञ्जलेः

[4] पाणिनिनः

112. मक्षिकाणाम् अभावः – इति विग्रहे कृते समस्तपदं किम् ?

[1] निर्मक्षिकम्

[2] निष्मक्षिकम्

[3] निर्गतमक्षिकम्

[4] निर्मक्षिका

113. पताका-प्रकरी-भेदात् द्विधा भवति –

[1] प्राकरणिकम्

[2] प्रासङ्गिकम्

[3] प्राधानिकम्

[4] कथानकम्

**114.** 'माता भूमिः पुत्रोऽहं पृथिव्याः' इयं पंक्तिरुद्धृता –

[1] अथर्ववेदस्य 12/11 तः

[2] अथर्ववेदस्य 12/1 तः

[3] अथर्ववेदस्य 12/21 तः

[4] अथर्ववेदस्य 12/31 तः

**115.** द्रुतविलम्बितच्छन्दसि प्रतिचरणं कति वर्णाः भवन्ति ?

[1] एकादश

[2]. द्वादश

[3] चतुर्दश

[4] षोडश

**116.** "सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।

वंशानुचरितञ्चैव ............. ।।"

श्लोकेऽत्र कस्य लक्षणं प्रतिपादितम् ?

[1] पुराणस्य

[2] उपनिषदः

[3] ब्रह्मसूत्रस्य

[4] महाकाव्यस्य

**117.** "शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने" इत्यस्यां पंक्तौ किं छन्दः ?

[1] मन्दाक्रान्ता

[2] शिखरिणी

[3] शार्दूलविक्रीडितम्.

[4] स्रग्धरा

**118.** "भवन्ति नम्रास्तरवः फलोद्गमैः,

नवाम्बुभिर्दूरविलम्बिनो घनाः।

अनुद्धताः सत्पुरुषाः समृद्धिभिः,

स्वभाव एवैष ............. ।।"

श्लोकेऽस्मिन् केषां स्वभावो वर्णितः ?

[1] विद्यार्थिनाम्

[2] सत्पुरुषाणाम्

[3] परोपकारिणाम्.

[4] वीरपुरुषाणाम्

**119.** कादयो मावसानाः के ?

[1] परार्थाभिधानाः

[2] पदार्थाभिधानाः

[3] स्पर्शाः

[4] विश्लिष्टस्पृष्टाः

0. 'लभ्यम्' इति पदे प्रकृतिप्रत्ययौ स्तः –

[1] लभ् + क्यप्

[2] लभ् + यत्

[3] लभ् + ल्यप्

[4] लभ् + ण्यत्

21. 'राधा स्थाल्यां तण्डुलोदनं पचति' इत्यत्र केन सूत्रेण सिध्यति ?

[1] सप्तम्यधिकरणे

[2] यस्य च भावेन भावलक्षणम्

[3] षष्ठी चानादरे

[4] भुवः प्रभवः

122. कस्य व्यवधाने सति नकारस्य णकारो न भवति ?

[1] कवर्गस्य

[2] पवर्गस्य

[3] चवर्गस्य

[4] 'अट्' वर्णानाम्

123. "उदिते ............. कमलं विकसति।" उचितपदेन रिक्तस्थानं पूरयत –

[1] सविते

[2] सवितरि

[3] सवितरे

[4] सवितायाम्

124. भिन्नवर्गीयं पदं चिनुत –

[1] अधिरोढुम्

[2] हन्तुम्

[3] सेतुम्

[4] निर्मातुम्

125. कालक्रमानुसारम् एतेषु कः सर्वप्रथमम् आसीत् ?

[1] भट्टमथुरानाथ शास्त्री

[2] पं० पद्म शास्त्री

[3] डॉ० प्रभाकर शास्त्री

[4] देवर्षि कलानाथ शास्त्री

126. आर्या-छन्दसः सन्दर्भे समुचितं कथनमस्ति –

[1] प्रथमे चरणे चतुर्दश मात्राः भवन्ति।

[2] तृतीये चरणे अष्टादश मात्राः भवन्ति।

[3] चतुर्थे चरणे पञ्चदश मात्राः भवन्ति।

[4] द्वितीये चतुर्थे च मात्राणां गणना समाना भवति।

127. 'गुरु से धन स्वीकार करो।' इत्यस्य वाक्यस्य संस्कृतानुवादः –

[1] गुरुणा धनं स्वीकरोतु।

[2] गुरुम् धनं स्वीकरोतु।

[3] गुरोः धनं स्वीकरोतु।

[4] गुरौ धनं स्वीकरोतु।

**128.** संस्कृतसाहित्ये विदूषकरहितं नाटकं वर्तते –

[1] मुद्राराक्षसम्

[2] मालतीमाधवम्

[3] मालविकाग्निमित्रम्

[4] अभिज्ञानशाकुन्तलम्

**129.** अव्ययपदं विकारं प्राप्नोति –

[1] विभक्तिषु

[2] वचनेषु

[3] लिङ्गेषु

[4] न कुत्रापि

**130.** क्रोधाद् भवति .............. । रिक्तस्थानं पूरयतु –

[1] स्नेहः

[2] प्रेम

[3] सन्तोषः

[4] सम्मोहः

**131.** एषु सार्वधातुकप्रत्ययो वर्तते –

[1] तव्यत्

[2] तुमुन्

[3] क्त्वा

[4] शानच्

**132.** 'सेव्' धातोः लङ्लकारे प्रथमपुरुषैकवचने रूपम् –

[1] असेव्यत्

[2] असेव्यत

[3] असेवेत

[4] असेवत

**133.** लिह् + तुमुन् योगेन पदं स्यात् –

[1] लिहितुम्

[2] लेढुम्

[3] लोहितुम्

[4] लेहितुम्

**134.** "क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते सत्यम्।

विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु।।"

अत्र कोऽलङ्कारः ?

[1] आक्षेपः

[2] अपह्नुतिः

[3] व्यतिरेकः

[4] विरोधः

'धिक्' इति अव्ययपदस्य अर्थः अस्ति –

[1] भर्त्सनम्

[2] शङ्का

[3] किञ्चित्

[4] अल्पः

'वृकभीतिः' इत्यत्र कः समासः ?

[1] तृतीयातत्पुरुषः

[2] पंचमीतत्पुरुषः

[3] षष्ठीतत्पुरुषः

[4] चतुर्थीतत्पुरुषः

. 'शेमुषी' इत्यस्य समुचितोऽर्थोऽस्ति –

[1] सरित्

[2] वाग्वर्धिनी

[3] बुद्धिः

[4] धृतिः

8. समुचितं विकल्पं चिनुत –

[1] ईषत्स्पृष्टम् – यण्

[2] ईषद् विवृतम् – अच्

[3] विवृतम् – शल्

[4] स्पृष्टम् – झल्

**139.** 'वारि' शब्दस्य रूपेषु असङ्गतं विकल्पं चिनुत –

[1] द्वितीया – द्विवचने – वारिणी

[2] प्रथमा – बहुवचने – वारीणि

[3] सप्तम्यैकवचने – वारिणे

[4] षष्ठ्यैकवचने – वारिणः

**140.** शिशुः उपगङ्गम् उषितवान् – अत्र कति अव्ययपदानि सन्ति ?

[1] त्रीणि

[2] एकम्

[3] द्वे

[4] एकमपि नास्ति

**141.** दशकुमारचरितेन सम्बद्धं नास्ति –

[1] राजवाहनचरितम्

[2] विश्रुतचरितम्

[3] सोमदत्तचरितम्

[4] कुसुमोद्भवचरितम्

**142.** 'आरुणि-श्वेतकेतुसंवादः' कस्यामुपनिषदि वर्तते ?

[1] प्रश्नोपनिषदि

[2] तैत्तिरीयोपनिषदि

[3] छान्दोग्योपनिषदि

[4] मैत्रायण्युपनिषदि

**143.** ग्रह् धातोः क्त प्रत्यये सति किं रूपं स्यात् ?

[1] गृहीतम्

[2] ग्रहीतम्

[3] ग्रहितम्

[4] गृहितम्

**144.** छिद् धातोः 'क्त' प्रत्यये सति किं रूपम् स्यात् ?

[1] छिदितः

[2] छिदः

[3] छित्तः

[4] छिन्नः

**145.** आस्-धातोः शानचि पुंसि रूपम् स्यात् –

[1] आसनः

[2] आसमानः

[3] आसानः

[4] आसीनः

**146.** 'सभी नदियों को नमस्कार करता हूँ।' वाक्यस्य समुचितः संस्कृतानुवादोऽस्ति –

[1] सर्वाभ्यः नदीभ्यः नमः।

[2] सर्वाः नदीः नमस्करोमि।

[3] सर्वाः नद्यः नमामि।

[4] सर्वां नदीं नमामि।

**147.** इष् धातोः लोट्लकारस्य प्रथमपुरुषैकवचने किं रूपं स्यात् ?

[1] इष्यतु

[2] इच्छतु

[3] ऐच्छतु

[4] इच्छन्तु

**148.** 'ङीष्' प्रत्ययान्तः शब्दोऽस्ति –

[1] हसन्ती

[2] मालिनी

[3] किशोरी

[4] नर्तकी

**149.** "त्वम्, आवां महिमा च मन्दिरं .....।"

वाक्ये उचितं क्रियापदं लिखत –

[1] गच्छेम

[2] गच्छेयुः

[3] गच्छेत

[4] गच्छेव

**150.** "न कान्तमपि निर्भूषं विभाति वनिताननम्।" उक्तिरियमस्ति –

[1] वामनस्य

[2] जयदेवस्य

[3] कुन्तकस्य

[4] भामहस्य